# Rishi Agastyaproktam Shivarchanopadesham 3

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૩

## Document Information

Text title : Rishi Agastyaproktam Shivarchanopadesham 3

File name : shivArchanopadesham3.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 28 madhyArjunamahimAnuvarNanam | 227-256||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૩

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અગસ્ત્યઃ (ઉવાચ)

અત એવ મહાદેવઃ પૂજનીયો મહર્ષિભિઃ ।
સમર્ચયન્ત્યુમાકાન્તમિન્દ્રોપેન્દ્રાદયઃ સુરાઃ ॥ ૨૨૭॥

અત્યન્તશ્રદ્ધયા દેવં યેઽર્ચયન્તિ મહેશ્વરમ્ ।
તેષામાયુષ્યમારોગ્યમપવર્ગશ્ચ જાયતે ॥ ૨૨૮॥

પુણ્યા શિવા શિવઃ પુણ્યઃ પુણ્યં તિર્યક્ત્રિપુણ્ડ્રકમ્ ।
શિવલિઙ્ગાર્ચનં પુણ્યં પુણ્યમાનન્દકાનનમ્ ॥ ૨૨૯॥

એતત્પ્રાતઃ સમુત્થાય સ્મર્તવ્યં પુણ્યપઞ્ચકમ્ ।
સ્મરણેનાસ્ય સતતં જાયતે પુણ્યવાન્નરઃ ॥ ૨૩૦॥

ઉમાસહાયમિત્યાદિવેદમન્ત્રૈઃ શિવઃ પ્રગે ।
સ્મર્તવ્યઃ સતતં વિપ્રૈઃ સર્વસિધ્યર્થમાદરાત્ ॥ ૨૩૧॥

શિવ શઙ્કર ગૌરીશ વિશ્વનાથ મહેશ્વર ।
દેવોત્તમેતિ નામાનિ પ્રાતર્જપ્યાનિ સજ્જનૈઃ ॥ ૨૩૨॥

ભવાની સ્કન્દજનની ગૌરી શઙ્કરવલ્લભામ્ ।
શિવેતિ પ્રાતરુત્થાય સ્મર્તવ્યા જગદમ્બિકા ॥ ૨૩૩॥

પ્રાતઃ કાલાન્યકાલેઽપિ શિવ શમ્ભો મહેશ્વર ।
મહાદેવેતિ નામાનિ જપનીયાનિ સજ્જનૈઃ ॥ ૨૩૪॥

સ્મર્તવ્યઃ કીર્તનીયશ્ચ જપનીયશ્ચ શઙ્કરઃ ।
યતસ્તત્સ્મરણાદીનિ મુક્તિદાનિ મહામુને ॥ ૨૩૫॥

તન્મનો યેન મનસા સ્મર્યન્તે પાર્વતીપતિઃ ।
સા જિહ્વા કીર્ત્યતે સામ્બઃ સતતં જિહ્વયા યયા ॥ ૨૩૬॥

સ હસ્તો યેન હસ્તેન બિલ્વૈઃ સમ્પૂજ્યતે શિવઃ ।
તચ્છિરો યેન શિરસા નમ્યતે ભગવાન્ શિવઃ ॥ ૨૩૭॥

તૌ પાદૌ યૌ શિવક્ષેત્રે ભક્ત્યા પર્યટતો મુદા ।
સ પુણ્યો યેન વા કાશ્યાં સ્વશરીરં સમર્પિતમ્ ॥ ૨૩૮॥

પદ્ભ્યાં પ્રદક્ષિણાઃ કાર્યાઃ સાવધાનં શિવાલયે ।
હસ્તાભ્યાં અતિયત્નેન કર્તવ્યં શઙ્કરાર્ચનમ્ ॥ ૨૩૯॥

પ્રણામાઃ સ્વશરીરેણ કર્તવ્યાઃ પાર્વતીપ્રભોઃ ।
શ્રોત્રાભ્યામતિયત્નેન શ્રોતવ્યાઃ શાઙ્કરાઃ કથાઃ ॥ ૨૪૦॥

નેત્રાભ્યામતિયત્નેન દ્રષ્ટવ્યઃ પૂજિતઃ શિવઃ ।
ઘ્રાણેન ઘ્રેયમમલં બિલ્વપત્રં શિવાર્પિતમ્ ॥ ૨૪૧॥

જિહ્વયા શ્રીમહાદેવઃ કીર્તનીયઃ પ્રયત્નતઃ ।
સ્પ્રષ્ટવ્યં શિવલિઙ્ગં ચ શ્રદ્ધયા યત્સમર્ચિતમ્ ॥ ૨૪૨॥

ધ્યાતવ્યો મનસા નિત્યમુમાદેહાર્ધવિગ્રહઃ ।
વેદવેદાન્તસંવેદ્યઃ સર્વદા શ્રીસદાશિવઃ ॥ ૨૪૩॥

ઇન્દ્રિયૈઃ ષડ્ભિરપ્યાર્યાસ્તત્તદિન્દ્રિયકર્મભિઃ ।
શિવમેવાનિશં ભક્ત્યાઽઽરાધયન્તિ મુમુક્ષવઃ ॥ ૨૪૪॥

યજન્તે વિવિધૈર્યજ્ઞૈઃ શિવમેવ હિ યાજિનઃ ।
યતો દેવાધિદેવોઽયં યજ્ઞકર્મફલપ્રદઃ ॥ ૨૪૫॥

ચિન્તયન્તિ મહાદેવં યોગિનો યુક્તમાનસાઃ ।
યતો દેવાધિદેવોઽયં યોગકર્મફલપ્રદઃ ॥ ૨૪૬॥

શિવાત્પરતરં નેતિ યે ભજન્તિ મહેશ્વરમ્ ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૪૭॥

શિવનામમણિં કણ્ઠે સદા સન્ધારયન્તિ યે ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૪૮॥

સન્ધારયન્તિ યે શુદ્ધં ત્રિપુણ્ડ્રં શિવભૂષણમ્ ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૪૯॥

યેષાં દેવગણાધીશો મહેશઃ કુલદૈવતમ્ ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૫૦॥

યેષાં સર્વાર્થદં નિત્યં વ્રતં શઙ્કરપૂજનમ્ ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૫૧॥

યેષાં શિવાર્ચનાદન્યદ્વ્રતં નાસ્ત્યેવ સર્વથા ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૫૨॥

યેષાં શિવાન્યદેવેષુ શિવભક્તત્વધીઃ સદા ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૫૩॥

યેષાં મહેશ્વરે સામ્બે સર્વદેવોત્તમત્ત્વધીઃ ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૫૪॥

યેષાં ચિત્તં પરાવૃત્તં મહાદેવાન્યદર્શનાત્ ।
તે ધન્યાસ્તે સદાચારાસ્તે પૂજ્યા ધર્મમૂર્તયઃ ॥ ૨૫૫॥

કર્મણા મનસા વાચા નિત્યમવ્યભિચારતઃ ।
યઃ પૂજયેન્મહારુદ્રં સ મોક્ષમધિગચ્છતિ ॥ ૨૫૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાપ્રતિ ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશં ૩ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૮ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૨૨૭-૨૫૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 28 madhyArjunamahimAnuvarNan
. 227-256..

Notes:
Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Rājā રાજા) about worshiping Śiva શિવ.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivarchanopadesham 3*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*